## आयुर्दायाध्यायः

**लग्नाधीशोतिवीर्यो …… आयुर्नराणाम् ॥२॥**

जातके बलिष्ठः लग्नाधिपः केन्द्रस्थितैः शुभग्रहैः यदि दृष्टः तर्हि दीर्घम् आयुः लभ्यते। बलिष्ठः लग्नाधिपः लग्नभावे, लग्नात् केन्द्रभावेषु शुभग्रहाः, चन्द्रः स्वकीयोच्चराशौ च यदि स्यात् तर्हि ६० वर्षमितम् आयुः लभ्यते।

| | | | |
|---|---|---|---|
| ल | गु | | |
| | दीर्घायुः | | |
| | | | |
| च | | | बु शु |

| | | | |
|---|---|---|---|
| ल गु | | च | |
| | ६० | | |
| | | | |
| | | | बु शु |

**सौम्याः केन्द्रालयस्थाः ……….. आयुर्नराणाम् ॥३॥**

लग्नात् चन्द्रात् वा केन्द्रभावे शुभग्रहाः, लग्ने गुरुः च यदि स्यात्, लग्नादष्टमे कस्यापि पापग्रहस्य दृष्टिः युतिः वा यदि न स्यात् तर्हि ७० वर्षमितम् आयुः भवति।

यदि गुरुः स्वोच्चे भवति, अन्ये सर्वे शुभग्रहाः स्वकीयमूलत्रिकोणराशौ भवन्ति, लग्नाधिपश्च बलिष्ठः भवति तर्हि ८० वर्षमितम् आयुः भवति।

| | | | |
|---|---|---|---|
| ल गु | | श | च |
| | ७० | | |
| | | | |
| बु शु | र कु | | |

| | | | |
|---|---|---|---|
| | | च | |
| | ८० | | गु |
| ल श | | | |
| | | शु | बु |

**सौम्ये केन्द्रेऽतिवीर्ये यदि …… कोणगाः सौम्यखेटाः॥४॥**

यदि लग्नात् केन्द्रभावे बलिष्ठः बुधः, तथा च लग्नात् अष्टमे कश्चिदपि ग्रहः न भवेत् तर्हि ३० वर्षमितम् आयुः भवति।

परन्तु अत्र अष्टमभावोपरि शुभग्रहस्य दृष्टिः भवति चेत् ४० वर्षमितम् आयुः भवति।

गुरुः स्वराशौ स्वद्रेष्काणे च भवति चेत् २७ वर्षमितम् आयुः भवति।

यदि कर्काटकराशिः लग्नं तत्रैव चन्द्रः, लग्नात् सप्तमे कश्चित् शुभग्रहः च भवति तर्हि ६० वर्षमितम् आयुः भवति।

यदि कर्काटकराशिः लग्नं तत्रैव गुरुः, लग्नात् त्रिकोणभावयोः शुभग्रहाः च भवन्ति तर्हि ८० वर्षमितम् आयुः भवति ।

**कीटे लग्ने सुरेज्ये ......... द्विपक्षाः ॥५॥ (कीटे लग्ने सुरेज्ये इति पूर्वेण श्लोकेन सम्बन्धः)**

लग्नादष्टमाधिपः नवमभावे, पापदृष्टः लग्नाधिपः लग्ने अथवा अष्टमभावे यदि भवति [ अथवा लग्नादष्टमाधिपः नवमभावे, लग्नाधिपः लग्ने, अष्टमभावाधिपः पापदृष्टः च यदि भवति] तर्हि २४ वर्षमितम् आयुः भवति।

लग्नाधिपः अष्टमाधिपश्च अष्टमभावे यदि भवेताम् तर्हि २७ वर्षमितम् आयुः भवति।

पापयुतः चन्द्रदृष्टः च गुरुः लग्नभावे, लग्नात् अष्टमे अन्यः कश्चन ग्रहः च यदि स्यात् तर्हि २२ वर्षमितम् आयुः भवति ।

**लग्नेन्दू क्रूरहीनौ............. शतं स्यात् ॥६॥**

यदि लग्ने गुरुः, लग्नात् केन्द्रे एकः शुभग्रहः (बुधः), लग्नात् अष्टमे ग्रहाभावः, लग्नचन्द्रौ पापयोगरहितौ च भवन्ति तर्हि ७० वर्षमितम् आयुः भवति। अस्मिन्नेव योगे केन्द्रे गुरुशुक्रौ यदि भवेतां तर्हि १०० वर्षमितम् आयुः भवति। अपि च कर्काटकराशौ लग्ने तस्मिन् गुरौ लग्नात् केन्द्रे शुक्रे च सति १०० वर्षमितम् आयुः भवति।

यदि शनिः लग्ने नवमे वा भवति, चन्द्रः व्यये नवमे वा स्यात् तर्हि १०० वर्षमितम् आयुः भवति।

| | | | |
|---|---|---|---|
| ल गु | | च | |
| | ७० | | |
| | | | |
| | | | बु |

| | | | |
|---|---|---|---|
| ल गु | | च | शु |
| | १०० | | |
| | | | |
| | | | |

| | | | |
|---|---|---|---|
| | | | |
| | १०० | | ल गु |
| | | | |
| | | शु | |

| | | | |
|---|---|---|---|
| | | | च/श |
| | १०० | | |
| | | | |
| | | ल श | /च |

**धीकेन्द्रायुर्नवस्थाः यदि ........ उच्चगेऽब्जे॥७॥**

यदि धनूराशिः मीनराशिः वा लग्नं तस्मात् केन्द्रे गुरुः शुक्रो वा भवति, १-४-७-१०-५-८-९ स्थानेषु पापाः न भवन्ति, अष्टम-नवमयोः शुभदृष्टिः च भवति तर्हि १०० वर्षमितम् आयुः भवति।

| | | | |
|---|---|---|---|
| गु | | श | |
| शु र | १०० | | |
| बु | | | |
| ल | | कु | |

| | | | |
|---|---|---|---|
| ल गु | र | बु | शु |
| कु | १०० | | |
| श | | | |
| | | | |

यदि जातके गुरुशुक्रौ बलिष्ठौ भवतः, लग्नात् चन्द्रात् वा अष्टमे कोऽपि ग्रहः न भवति तर्हि पूर्णम् आयुः जीवति।

यदि वृषभराशिः लग्नं तत्र चन्द्रः, अन्ये सर्वे शुभग्रहाः स्वक्षेत्रे भवन्ति तर्हि ६० वर्षमितम् आयुः भवति।

| | | | |
|---|---|---|---|
| शु ल | | च | |
| | पूर्णायुः | | गु |
| | | | |
| | | | |

| | | | |
|---|---|---|---|
| | | ल च | |
| | ६० | | |
| | | | |
| गु | | शु | बु |

**कोदण्डान्त्यार्धमङ्गम् ………… पुष्करेऽब्जे ॥ ८॥**

यदि धनूराशेः उत्तरार्धे लग्नम्, वृषभराशौ २४ अंशे बुधः, अन्ये ग्रहाः (रवि-चन्द्र-कुज-गुरु-शुक्र-शनयः) स्वकीयोच्चराशौ च भवन्ति तर्हि मनुष्यः पूर्णम् आयुः जीवति।

यदि लग्नात् केन्द्रभावे गुरुशुक्रौ, एकादशे भावे चन्द्रश्च स्यात् तर्हि मनुष्यः पूर्णम् आयुः जीवति।

मीनराशौ लग्ने तत्रैव शुक्रे, शुभग्रहदृष्टे चन्द्रे अष्टमभावस्थे, लग्नात् केन्द्रे गुरौ च सति मनुष्यः शतं वर्षाणि जीवति।

| | | | |
|---|---|---|---|
| शु | र | च बु२४° | |
| | पूर्णायुः | | गु |
| कु | | | |
| ल२७° | | श | |

| | | | |
|---|---|---|---|
| शु | | | |
| | पूर्णायुः | | च |
| | | | |
| गु | | | ल |

| | | | |
|---|---|---|---|
| शु ल | बु | | गु |
| | १०० | | |
| | | | |
| | | च | |

**वागीशे वीर्ययुक्ते ………. तदायुः॥९॥**

लग्नाधिपतौ अष्टमस्थे, चन्द्रे दशमस्थे, बलिष्ठे गुरौ यस्मिन् कस्मिन् वा भावे स्थिते, अन्येषु ग्रहेषु नवमस्थेषु सत्सु वर्षाणां शतम् आयुः लभ्यते।

कर्कराशौ लग्ने, लग्नात् तृतीये गुरौ, षष्ठे चन्द्रे, केन्द्रभावे बुध-शुक्रयोः सतोः च वर्षाणां शतम् आयुः लभ्यते।

यदि लग्नभावे गुरुः, लग्नात् केन्द्रभावे तत्रापि गुरोः नवांशे रवि-कुज-शनयः, अन्ये (चन्द्र-बुध-शुक्राः) अष्टमात् अन्यत्र भवन्ति तर्हि ८५ वर्षमितम् आयुः भवति।

| | | | |
|---|---|---|---|
| | ल | | |
| | १०० | | गु |
| च | | | |
| र बु शु श | कु | | |

| | | | |
|---|---|---|---|
| | | | |
| | १०० | | ल |
| | | | |
| च | | बु शु | गु |

| | | | |
|---|---|---|---|
| र २° | बु | च | ल गु |
| शु | ८५ | | |
| | | | |
| कु२७° | | | श९° |

**क्रूरैर्दृष्टेऽङ्गनाथे ….. अक्षिसंख्यम्॥१४॥**

यदि पापग्रहाः लग्नाधिपं पश्यन्ति, शुभग्रहाः बलिष्ठाः, चन्द्रः शुभषड्वर्गे च यदि भवति तर्हि ७३ वर्षमितम् आयुः भवति।

दिवाकाले जनिमतां जातके चन्द्रात् अष्टमभावे पापग्रहाः भवन्ति चेत् मध्यमम् आयुः भवति।

यदि द्विस्वभावराशिः लग्नं तत्रैव शनिः, बलहीनः व्ययाधिपतिः अष्टमे च स्यात् तर्हि २५ वर्षमितम् आयुः भवति।

**कर्केऽङ्गे सप्तसप्तौ ......... लग्ननाथाढ्यचन्द्रे ॥ १५॥** (लग्ननाथाढ्यचन्द्रे इति अग्रिमेण श्लोकेन सम्बन्धः)

कर्काटकराशौ लग्ने तस्मिन् पापग्रहयुते रवौ, लग्नात् दशमे चन्द्रे, केन्द्रभावे गुरौ च सति ५५ वर्षमितम् आयुः भवति।

जातके लग्नात् दशमे चतुर्थे वा बुधे, लग्ने अष्टमे द्वादशे वा चन्द्रे, एकस्मिन् राशौ गुरु-शुक्रयोः सतोः च ५० वर्षमितम् आयुः भवति।

| | | | |
|---|---|---|---|
| | च | | |
| | ५५ | | ल र कु |
| | | | |
| | | गु | |

| | | | |
|---|---|---|---|
| | | | |
| च | ५० | | ल |
| | | | |
| गु शु | | बु | |

**शन्यंशे लग्ननाथे ........ शत्रुभौमान्वितश्चेत्॥१६॥**

यदि लग्नाधिपेन युतः चन्द्रः ६-८-१२ वा राशौ भवति, लग्नाधिपः शनिनवांशे च भवति तर्हि ५८ वर्षमितम् आयुः भवति।

यदि लग्नाधिपः पापयुतः त्रिकभावे (६-८-१२), शुभग्रहाः ८-१२ भावं हित्वा अन्यराशिषु च भवन्ति तर्हि ६० वर्षमितम् आयुः भवति।

यदि जन्मराश्यधिपः जन्मलग्नाधिपः रविश्च अष्टमभावे, गुरुः केन्द्रात् बहिर्भागे च भवति तर्हि ६० वर्षमितम् आयुः भवति।

यदि जन्मकाले गुरुः बलहीनः, स्वशत्रुभ्यां (शुक्र-शनिभ्याम्) कुजेन च युतः रविः लग्नभावे, चन्द्रः ५-१२ वा भावे च भवति तर्हि ७० वर्षमितम् आयुः भवति।

| | | | |
|---|---|---|---|
| | | | ल |
| | ५८ | | |
| बु३° च | | | |
| | | | |

| | | | |
|---|---|---|---|
| | | | ल |
| | ६० | | |
| बु कु | | | |
| शु | च | गु | |

| | | | |
|---|---|---|---|
| | | च | ल |
| | ६० | | |
| र बु शु | | | |
| | | गु | |

| | | | |
|---|---|---|---|
| ल र कु शु श | | | |
| च | ७० | | |
| गु | | | |
| | | | |

**वागीशे हीनवीर्ये ...... षष्टिरायुर्नराणाम्॥१७॥ (प्रथमपादस्य पूर्वेण श्लोकेन सम्बन्धः)**

सर्वे ग्रहाः नवमभावे भवन्ति चेत् पूर्णम् आयुः लभ्यते। सर्वे ग्रहाः पञ्चमभावे भवन्ति चेत् ६० वर्षमितम् आयुः भवति।

सर्वे ग्रहाः पापग्रहाणां नवांशे स्थित्वा केन्द्रभावेषु भवन्ति चेत् ८० वर्षमितम् आयुः भवति।

यदि लग्नाधिपः पूर्णबलः, पापग्रहाणां राशिषु पापग्रहाः, शुभग्रहाणां राशिषु शुभग्रहाः च भवन्ति तर्हि पूर्णम् आयुः लभ्यते।

| | | | |
|---|---|---|---|
| च६° | | | ल गु६° |
| | ८० | | |
| | | | |
| कु१° श१६° | | | र२° बु६° शु६° |

| | | | |
|---|---|---|---|
| शु | र | बु | ल |
| श | पूर्णायुः | | |
| | | | कु |
| च | | गु | |

**सारङ्गस्यान्त्यभागे ........ ..... खरामाः ॥१८॥**

यदि धनूराशेः अन्तिमनवांशे लग्नम्, सर्वे शुभग्रहाः लग्नात् केन्द्रभावे तत्रापि तद्राशेः प्रथमनवांशे भवन्ति तर्हि १०० वर्षाणि आयुः भवति।

यदि सर्वे ग्रहाः ३-४-८ भावेषु भवन्ति तर्हि दीर्घम् आयुः भवति।

लग्नात् चन्द्रात् च अष्टमाधिपः १-४-७-१०-१२ वा भावेषु (अथवा द्वादशात् केन्द्रभावे) भवति चेत् २८ वर्षाणाम् आयुः भवति।

यदि लग्नात् केन्द्रभावे कोऽपि ग्रहः न भवति, कश्चित् एकः वा ग्रहः ८ भावे भवति तर्हि ३० वर्षाणाम् आयुः भवति।

| | | | |
|---|---|---|---|
| बु २° शु १° | | | गु ३° |
| | १०० | | |
| | | | |
| ल२७° | | | च२° |

| | | | |
|---|---|---|---|
| च गु | | | ल |
| | दीर्घायुः | | |
| | | | र बु |
| | | | शु कु श |

| | | | |
|---|---|---|---|
| | | | श |
| गु | २८ | | च |
| | | | ल |
| | | | |

| | | | |
|---|---|---|---|
| | | | |
| | २८ | | च |
| | | | ल |
| गु श | | | |

| | | | |
|---|---|---|---|
| | | र बु शु | ल |
| | ३० | | श कु |
| गु | | | |
| | च | | |

**क्षीणे प्रालेयभानौ .... ......... पापखेटौ ॥१९॥**

यदि जन्मकाले चन्द्रः क्षीणः, लग्नात् अष्टमभावे पापग्रहः, अष्टमाधिपः केन्द्रभावे, लग्नाधिपः बलहीनः च भवति तर्हि २० वर्षमितम् आयुः स्यात्।

यदि जन्मकाले शुभग्रहाः आपोक्लिमभावेषु, चन्द्रः शनिश्च ६-८ भावयोः च भवन्ति तर्हि ५ वर्षमितम् आयुः स्यात्।

यदि चन्द्रेण राहुणा वा रहितौ द्वौ पापग्रहौ २-८ वा भावे तथा च व्ययभावे भवेतां तर्हि २० वर्षमितम् आयुः स्यात्।

| | | | |
|---|---|---|---|
| | श | | |
| कु | २० | | ल |
| | | | |
| र च | | | |

| | | | |
|---|---|---|---|
| श | बु शु | | |
| | ५ | | |
| च | | | ल |
| | | गु | |

| | | | |
|---|---|---|---|
| | | | |
| | २० | | |
| | | | |
| श कु | ल | र बु | |

**हीनौ स्वर्भानुना वा .................. स्यादनायुः ॥२०॥** **(प्रथमपादस्य पूर्वेण श्लोकेन सम्बन्धः)**

यदि लग्नात् केन्द्रभावे रविशनी, लग्ने कुजः च भवति तर्हि ५ वर्षमितम् आयुः स्यात्।

यदि गुरुशुक्रौ लग्नभावे, पापयुक्तः कुजः पञ्चमभावे च भवति तर्हि अल्पायुः भवति।

यदि शुभेन पापेन च युक्तः दृष्टः वा जन्मराश्यधिपतिः रविणा युक्तः लग्नभावे भवति तर्हि अल्पायुः भवति।

| | | | |
|---|---|---|---|
| | र श | | |
| | ५ | | ल कु |
| | | | |
| | | | |

| | | | |
|---|---|---|---|
| | | कु श | |
| | अल्पायुः | | |
| ल गु शु | | | |
| | | | |

| | | | |
|---|---|---|---|
| श | च | ल र कु | |
| | अल्पायुः | | |
| गु | | | |
| | | | |

**॥ इति जातकालङ्कारे आयुर्दायाध्यायः पञ्चमः ॥**

## जातकालङ्कारः

## वैपरीत्यभावफलाध्ययः

विपरीतभावफलम् इत्युक्ते द्वयोः भावाधिपयोः परस्परभावस्थितेः फलम्। उदाहरणार्थं लग्नाधिपः द्वितीये, द्वितीयाधिपः लग्ने; नवमाधिपः दशमे, दशमाधिपः नवमे ……… इत्यादिः। एवं विपरीतभावस्थितेः फलम् अस्मिन् अध्याये निरूप्यते। तत्रादौ -

**लग्नाधीशेऽर्थगे …… मातृपक्षेण युक्तः ॥१॥**

- लग्नाधिपः द्वितीये -द्वितीयाधिपः लग्ने चेत् **धनिकः**, बुद्धिमान्, भोगी, सदाचारी च भवति।
- लग्नाधिपः तृतीये -तृतीयाधिपः लग्ने चेत् शक्तिहीनः, स्वजनसुखकरः, सम्मानितः, बन्धुपूज्यः च भवति।

**तुर्येशे लग्नयाते तदनु ……… ज्ञानवान्मानसक्तः॥२॥**

- लग्नाधिपः चतुर्थे -चतुर्थाधिपः लग्ने चेत् **क्षमावान्,** पितुः आज्ञापालकः, **बुद्धिमान्,** सद्गुरुः च भवति।
- लग्नाधिपः पञ्चमे -पञ्चमाधिपः लग्ने चेत् विद्यावान्, ज्ञानवान्, पूज्यः, शुद्धमनस्कः च भवति।

**षष्ठेशे लग्नयाते ……. सेवकः शालकस्य॥३॥**

- लग्नाधिपः षष्ठे -षष्ठाधिपः लग्ने चेत् रोगरहितः, **परद्रोहकर्ता, शरीरेण बलिष्ठः, धनी, द्रव्यसङ्ग्रहचतुरः** (अदाता) च भवति
- लग्नाधिपः सप्तमे -सप्तमाधिपः लग्ने चेत् पितृसेवानिरतः, सर्वदा स्त्रीविषये आसक्तः, पत्न्याः भ्रातुः सेवकश्च भवति।

**अङ्गेशे रन्ध्रयाते ……. तत्परो राजमान्यः ॥ ४॥**

- लग्नाधिपः अष्टमे -अष्टमाधिपः लग्ने चेत् द्यूतक्रीडासक्तः (वस्तूनि पणे निवेश्य क्रीडा), शूरः, चौर्यनिपुणः च भवति।
- लग्नाधिपः नवमे -नवमाधिपः लग्ने चेत् विदेशवासी, धर्मकार्यनिपुणः, राजसम्मानितः, देवतापरायणः च भवति।

**कर्मस्थे लग्ननाथे ……… कोविदो मानवः स्यात्॥५॥**

- लग्नाधिपः दशमे -दशमाधिपः लग्ने चेत् अधिकारी, विख्यातः, गुरुसेवानिरतः, धनी च भवति।
- लग्नाधिपः एकादशे -एकादशाधिपः लग्ने चेत् दीर्घायुः, भूपतिः, सुकर्मा, सम्पद्वान्, पण्डितः च भवति।

**लग्नेशे रिःफयाते ………… विलोलः ॥६॥**

* लग्नाधिपः द्वादशे -द्वादशाधिपः लग्ने चेत् सर्वेषां जनानां शत्रुः, बुद्धिहीनः, कृपणः, उपार्जितस्य धनस्य नाशकः, लोभयुक्तः, विलासजीवनयापकः च भवति।

| | | | |
|---|---|---|---|
| | | | ल च |
| | | | बु |
| | | | |
| | | | |

| | | | |
|---|---|---|---|
| | | | ल र |
| | | | |
| | | | बु |
| | | | |

| | | | |
|---|---|---|---|
| | ल च | | |
| | | | कु |
| | | | |
| | | | |

| | | | |
|---|---|---|---|
| | ल र | | |
| | | | |
| | | | कु |
| | | | |

| | | | |
|---|---|---|---|
| | | | ल कु |
| | | | |
| | | | |
| | बु | | |

| | | | |
|---|---|---|---|
| | | | ल गु |
| | | | |
| | | | |
| बु | | | |

| | | | |
|---|---|---|---|
| | | | ल श |
| | | | |
| बु | | | |
| | | | |

| | | | |
|---|---|---|---|
| | | | ल श |
| बु | | | |
| | | | |
| | | | |

| | | | |
|---|---|---|---|
| बु | | | ल गु |
| | | | |
| | | | |
| | | | |

| | | | |
|---|---|---|---|
| | बु | | ल कु |
| | | | |
| | | | |
| | | | |

| | | | |
|---|---|---|---|
| | | बु | ल शु |
| | | | |
| | | | |
| | | | |

एवमत्र लग्नाधिपतेः विपरीतस्थित्या फलानि प्रोक्तानि। अनेनैव क्रमेण द्वितीयादिभावाधिपतीनां विपरीतस्थित्या फलानि अस्माभिः ऊह्यानि।

**॥ इति जातकालङ्कारे वैपरीत्यभावफलाध्यायः षष्ठः ॥**

## जातकालङ्कारः

## विषकन्यायोगाध्यायः

**भौजङ्गे कृत्तिकायाम् ....... विषाख्या ॥१॥ पूर्वार्धम् ।**

नक्षत्र-वार-तिथीनां परस्परसंयोगेन विषकन्यायोगः सम्भवति इति अत्र उच्यते। यथा – आश्लेषा-कृत्तिका-शतभिषङ्नक्षत्राणि, रवि-शनि-कुजवासराः, भद्रातिथयः (२-७-१२) च एतेषां संयोगः यथासम्भवं भवति चेत् सः योगः विषयोगः अथवा विषकन्यायोगः इत्युच्यते। अयं योगः यस्मिन् दिने भवति तस्मिन् दिने या बाला जननं प्राप्नोति सा विषकन्या भवति।


| विषकन्यायोगः | नक्षत्रम् | वारः | तिथिः |
|---|---|---|---|
| | आश्लेषा कृत्तिका शतभिषक् | रविः शनिः कुजः | द्वितीया सप्तमी द्वादशी |

अथवा क्रमशः तत्तन्नक्षत्रवारतिथिषु इति केषाञ्चन मतम्। तदनुसारेण चिन्तयामश्चेत् – १) आश्लेषानक्षत्रयुक्ते रविवासरे द्वितीयातिथिः चेत् विषकन्यायोगः । २) कृत्तिकानक्षत्रयुक्ते शनिवासरे सप्तमीतिथिः चेत् विषकन्यायोगः । ३) शतभिषङ्नक्षत्रयुक्ते कुजवासरे द्वादशीतिथिः चेत् विषकन्यायोगः । इति।

| विषकन्यायोगः | नक्षत्रम् | वारः | तिथिः |
|---|---|---|---|
| | आश्लेषा | रविः | द्वितीया |
| | कृत्तिका | शनिः | सप्तमी |
| | शतभिषक् | कुजः | द्वादशी |

**लग्नस्थौ सौम्यखेटौ .............. विषाख्या ॥ १ ॥ उत्तरार्धम् ।**

लग्ने द्वौ शुभग्रहौ एकः पापग्रहश्च, तथा लग्नात् षष्ठभावे द्वौ पापग्रहौ च यदि भवन्ति तर्हि विषकन्यायोगः भवति। उदाहरणम् –



**मन्दाश्लेषा द्वितीया ....... सा विषाख्या ॥२॥ पूर्वार्धम् ।**

शनिवासरः आश्लेषानक्षत्रं द्वितीयातिथिः चैतेषां त्रयाणां संयोगः, कुजवासरः शतभिषन्नक्षत्रं सप्तमीतिथिः चैतेषां त्रयाणां संयोगः, रविवासरः विशाखानक्षत्रं द्वादशीतिथिः चैतेषां त्रयाणां संयोगः च विषकन्यायोगजनकः भवति।

| विषकन्यायोगः | वारः | नक्षत्रम् | तिथिः |
|---|---|---|---|
| | शनिः | आश्लेषा | द्वितीया |
| | कुजः | शतभिषक् | सप्तमी |
| | रविः | विशाखा | द्वादशी |

**धर्मस्थो भूमिसूनुः ............ कुमारी विषाख्या ॥२॥ उत्तरार्धम् ।**

जन्मकाले लग्नभावे शनिः, लग्नात् नवमभावे कुजः, लग्नात् पञ्चमभावे रविश्च यदि स्यात् तर्हि विषकन्यायोगः भवति।

उदाहरणम् -

| | | | |
|---|---|---|---|
| | | | ल श |
| कु | विषकन्या | | |
| | | | |
| | | र | |

**विषकन्यायोगदोषस्य परिहारः –**

**लग्नादिन्दोः ............ वैधव्यदोषम् ॥३॥**

जातके लग्नात् चन्द्रात् वा सप्तमाधिपः सप्तमे यदि स्यात् अथवा सप्तमभावे शुभग्रहः यदि स्यात् तर्हि विषकन्यादोषः अनपत्यतादोषः वैधव्यदोषश्च शमनं याति। उदाहरणम् -

| | | | |
|---|---|---|---|
| | | | ल गु च कु |
| | विषकन्यायोगभङ्गः | | |
| | | | |
| बु | र श | | |

| | | | |
|---|---|---|---|
| | | | ल श |
| कु | विषकन्यायोगभङ्गः | | |
| | | | |
| गु | | र | |

अत्र प्रथमकुण्डल्यां शुभग्रहः बुधः लग्नचन्द्राभ्यां सप्तमभावे वर्तते अतः दोषः परिहृतः। द्वितीयकुण्डल्यां लग्नात् सप्तमाधिपः गुरुः सप्तमभावे वर्तते इति दोषः परिहृतः।

## योगाध्यायः

ऋक्षेशः क्षीणवीर्यः ....... तस्य पुंसः ।२॥

- जन्मराश्यधिपतिः बलहीनः सन् ५/९ भावे वा यदि भवति तर्हि मनुष्यः क्रोधी भवति।
- जन्मराश्यधिपतिः लग्नाधिपेन सहितः ६/८/१२ भावे वा यदि भवति तर्हि मनुष्यः दुर्बलः=कृशकायः भवति ।
- पुरुषजातके ९/६/८ भावाधिपाः पापग्रहयुताः पापग्रहदृष्टाः वा यदि भवन्ति तर्हि तस्य पत्नी परपुरुषरता भवति, एवमेव स्त्रीजातके एतादृशे योगे सति तस्याः पतिः परस्त्रीरतः भवति ।

मातृस्थाने स्थितौ चेत् ...... अन्यजातः ॥३॥

- जातके ६-८ अधिपौ कुजचन्द्राभ्यां युतौ लग्नात् ४ भावे यदि भवेताम् अथवा -
- जातके ९-६ अधिपौ पापग्रहेण राहुणा (केतुना वा) च संयुतौ यदि भवेतां तर्हि परपुरुषजातः भवति ।

मूर्तीशः पापयुक्तो ..... अन्यजातः ॥ ५॥

- लग्नाधिपः पापयुतः सन् द्वितीयभावे यदि भवति तर्हि सः सौभाग्ययुतां स्त्रियं प्राप्नोति । एवमेव ७/६/२ भावाधिपाः पापग्रहयुताः द्वितीयभावे यदि भवन्ति तर्हि तत्पत्नी सुभगा भवति ।
- ३/७/४/१० अधिपाः लग्नाधिपेन संयुताः यदि भवन्ति तर्हि सः परपुरुषजातः इति चिन्तनीयम् ।

## <u>रोगयोगाः</u> –


**लग्नाधीशेन्दुपुत्रौ ...... तापगण्डः ॥ ६ ॥**


- जातके बुध-लग्नाधिपयोः कुज-चन्द्रयोः वा संयोगः राहुणा/केतुना सह भवति चेत् श्वेतकुष्ठरोगः स्यात् ।


| | | | |
|---|---|---|---|
| | बु श रा | | |
| ल | श्वेतकुष्ठरोगः | | |
| | | | |
| | | | |

| | | | |
|---|---|---|---|
| | | | |
| ल | श्वेतकुष्ठरोगः | | |
| | | | |
| | | | कु च रा |

- जातके रविः कुजेन युतः चेत् रक्तकुष्ठरोगः, रविः शनिना युतः चेत् कृष्णकुष्ठरोगः च स्यात् ।
- जातके लग्नाधिपतिः रविणा युतः ६/८/१२ वा यदि स्यात् तर्हि तापगण्डरोगः स्यात् ।




**ज्ञेयश्चन्द्रेण गण्डो .... तन्वधीशः ॥ ७ ॥**


- जातके लग्नाधिपतिः चन्द्रेण युतः ६/८/१२ वा यदि स्यात् तर्हि जलगण्डरोगः स्यात् ।
- जातके लग्नाधिपतिः कुजेन युतः ६/८/१२ वा यदि स्यात् तर्हि ग्रन्थिशस्त्रव्रणरोगः स्यात् ।
- जातके लग्नाधिपतिः बुधेन युतः ६/८/१२ वा यदि स्यात् तर्हि पित्तोद्भवः रोगः स्यात् ।
- जातके लग्नाधिपतिः गुरुणा युतः ६/८/१२ वा यदि स्यात् तर्हि आमशङ्कारोगः स्यात् ।
- जातके लग्नाधिपतिः शुक्रेण युतः ६/८/१२ वा यदि स्यात् तर्हि क्षयरोगः स्यात् ।
- जातके लग्नाधिपतिः शनिना राहुणा केतुना वा युतः ६/८/१२ वा यदि स्यात् तर्हि चौरैः/अन्त्यजैः दुःखं तदुद्भवः रोगः वा स्यात् ।

**चन्द्रो मेषे वृषे वा ..... क्रूरखेटैः ॥ ८ ॥ दृष्टश्चेद्वक्रशोफी ....... व्रणी स्यात् ॥ ९ ॥**


- कुजशनिभ्यां युतः चन्द्रः मेषे वृषे वा यदि स्यात् तर्हि श्वेतकुष्ठरोगः भवति।
- शुक्र-कुज-चन्द्र-शनयः कर्काटके वृश्चिके मीने वा यदि भवन्ति तर्हि देहे असौख्यं रक्तकुष्ठरोगश्च स्यात् ।
- शत्रुक्षेत्रस्थः गुरुः शुक्रः वा लग्ने यदि स्यात् तर्हि मुखे रोगः स्यात् ।
- कर्क-वृश्चिक-मीनराशिषु पापग्रहाः यदि भवन्ति तर्हि लूताख्यः रोगः कुष्ठरोगो वा भवति।
- लग्नात् व्ययभावे गुरुः यदि स्यात् तर्हि गुप्तरोगाः भवन्ति ।
- शनिकुजौ षष्ठभावे व्ययभावे वा यदि भवेतां तर्हि शरीरे व्रणाः उद्भवन्ति ।


**मेषे मीने कुलीरे .... भूमिजश्चेत्तथैव ॥ १० ॥**


- मेषे मीने कर्के मकरे वृश्चिके वा लग्नात् नवमभावे पापयुक्तौ शनिचन्द्रौ यदि भवेतां तर्हि मनुष्यः एकपादविहीनः अथवा विकलगतिः भवति।




- जातके लग्नस्थं चन्द्रं शनिं वा सप्तमदृष्ट्या कुजः यदि पश्यति तर्हि मनुष्यः बुद्धिहीनः भवति। तथैव रविचन्द्रयोः मध्ये कुजः यदि भवति तर्हि अपि बुद्धौ वैकल्यम् आगच्छति ।










**प्रालेयांशौ तनुस्थे ..... ..... पीडितौ वा ॥ ११ ॥**

- लग्ने चन्द्रः, लग्नात् दशमे बलिष्ठः शनिः, दशमस्थितस्य शनेः उपरि बुधस्य पूर्णदृष्टिश्च यदि स्यात् तर्हि मनुष्यः बुद्धिमान् स्यात्।





- लग्नस्थं कुजं चन्द्रं वा बुधः पूर्णदृष्ट्या यदि पश्यति तर्हि बुद्धिहीनता आगच्छति । अथवा चन्द्रः लग्नाधिपश्च कुजेन यदि पीडितौ तर्हि मनुष्यः बुद्धिहीनतां प्राप्नोति ।








लग्नस्थे रौहिणेये ….. कृष्णपित्ती सकम्पः ॥ १२ ॥

- लग्ने चन्द्रः, लग्नात् षष्ठभावे तत्रापि एकस्मिन्नेव अंशे पापदृष्टौ (शुभदृष्टिरहितौ च) रविशनी यदि भवेतां तर्हि मनुष्यः बुद्धिहीनः भवति।




- षष्ठाधिपः रविः पापयुतः सन् चतुर्थभावे यदि स्यात् तर्हि हृद्रोगी भवति।
- षष्ठाधिपः गुरुः शनिः वा पापयुतः सन् चतुर्थभावे यदि स्यात् तर्हि कृष्णपित्तरोगी भवति।












दुष्टैर्वा पीडितः सन् …… नरो दुःखभागी ॥ १३ ॥

- दुष्टैः पीडितः सन् सकम्पः भवति इति पूर्वश्लोकेन अन्वयः । अर्थात् लग्नाधिपः पापग्रहैः यदि पीडितः भवति तर्हि मनुष्यः भीतः भवति ।
- कुज-गुरु-शनयः लग्नात् चतुर्थभावे यदि भवन्ति तर्हि हृद्रोगः व्रणः वा भवति ।
- जातके लग्नात् चतुर्थे कुजः, पञ्चमे रवि-बुध-राहवः, अष्टमे शनिश्च यदि स्यात् तर्हि मनुष्यः दुःखी भवति






पश्येतां कामदृष्ट्या ...... प्रपश्येत् ॥ १५ ॥

- कुज-बुधौ सप्तमदृष्ट्या परस्परं यदि पश्यतः तर्हि जातः उन्नतकायः = उन्नतशरीरः भवति ।
- रवि-कुज-शनयः चन्द्रं यदि पश्यन्ति तर्हि जातः शान्तस्वभावः भवति ।

| | | | |
|---|---|---|---|
| | बु | | |
| | उन्नतशरीरः | | |
| | | | |
| | | कु | |

| | | | |
|---|---|---|---|
| | कु | | |
| | शान्तः | | च |
| र | | | |
| | | श | |

- यदि क्षीणचन्द्रः कुजेन सहितः (यस्मिन् कस्मिन् वा राशौ) भवति तर्हि जातः पापकर्मरतः स्यात् ।
- लग्नस्थः बुधः सप्तमदृष्ट्या गुरुं यदि पश्यति तर्हि हास्यासक्तः भवति ।

| | | | |
|---|---|---|---|
| | | | |
| | पापी | | |
| | | | |
| | कु च | र | |

| | | | |
|---|---|---|---|
| गु | | | |
| | हास्यकारः | | |
| | | | |
| | | | ल बु |

हास्यासक्तः सभौमे ...... वीर्यवत्खेटदृष्टः ॥ १६ ॥ (हास्यासक्तः इति पूर्वश्लोकेन सह अन्वयः)

- कुज-बुधौ शुभग्रहराशौ अथवा शनेः राशौ रविदृष्टौ भवतः चेत् हास्यकलानिपुणः = comedian भवति ।

| | | | |
|---|---|---|---|
| | | | |
| | | | |
| | | | |
| कु बु | | | |

| | | | |
|---|---|---|---|
| | | | |
| कु बु | | | |
| | | | र |
| | | | |

- त्रिकस्थः चन्द्रः शुक्रं यदि पश्यति तर्हि विस्मयालुः=आश्चर्यजनकः=Magician भवति ।
- कुज-बुध-चन्द्राः बलिष्ठैः ग्रहैः दृष्टाश्चेत् जातः वाग्मी भवति ।


| | | | |
|---|---|---|---|
| | | च | |
| | विस्मयालुः | | |
| | | | |
| ल | शु | | |


| | | | |
|---|---|---|---|
| च | | | |
| | वाग्मी | | गु |
| बु | | | |
| र शु | कु | | श |

**व्यभिचारियोगाः -** “शुक्रज्ञौ द्यूनयातौ ...... भार्गवे हि” ॥ १७ ॥

- जन्मकाले बुध-शुक्रौ ७/८/१० वा यदि भवतः तर्हि -
- जन्मकाले कुज-शुक्रौ ४/७/१० वा यदि भवतः तर्हि -
- चन्द्रात् दशमे, शनेः चतुर्थे च शुक्रः यदि स्यात् तर्हि -
- बुध-शुक्र-शनयः ७/१० वा यदि भवन्ति तत्र शुक्रः स्वक्षेत्रे यदि स्यात् तर्हि मनुष्यः व्यभिचारी भवति ।













मन्दे नक्रेऽल्पभाषी ....... पापखेटैः ॥ २१ ॥


- जन्मकाले शनिः मकरराशौ यदि स्यात् तर्हि मनुष्यः अल्पभाषी भवति ।
- षष्ठाधिपः चन्द्रः अदृश्यचक्रार्धे अथवा षष्ठाधिपः चन्द्रः पापयुतः चेत् नेत्रयोः (तिलमशकादि) चिह्नं भवति ।





- शुक्रदृष्टिरहितं क्षीणं चन्द्रं शनिः पश्यति चेत् मनुष्यः अल्पनेत्रः स्यात् ।
- कर्कराशिस्थितं चन्द्रं ७ – १० भावस्थिताः पापग्रहाः पश्यन्ति चेत् अल्पनेत्रः नेत्ररोगी वा स्यात् ।





स्यान्नूनं चाल्पनेत्रः ....... भार्गवे क्रूरदृष्टे ॥ २२ ॥ (स्यान्नूनं चाल्पनेत्रः इति पूर्वेण श्लोकेन सम्बन्धः)


- गुरुशुक्रौ लग्नभावस्थितं कुजं चन्द्रं वा पश्यतः चेत् मनुष्यः काणः=एकनेत्रहीनः=एकस्मिन् नेत्रे दृष्टिहीनः भवति ।





- जातके सूर्यात् अग्रभागे कुजः=सूर्यस्फुटात् अग्रभागे कुजः (अल्पैः दिनैः अन्तरे सूर्यसान्निध्यात् कुजः यदि अस्तं गच्छति) यदि स्यात् तर्हि मनुष्यस्य नेत्रयोः दृष्टिशक्तिः अल्पा भवति ।
- एवमेव सूर्यात् अग्रभागे बुधः यदि स्यात् तर्हि नेत्रयोः तिलमशकादि चिह्नं भवति ।





नेत्रे पीडाश्रुपातात् ...... व्याधियुक्तः ॥ २३ ॥


- जातके लग्ने अष्टमे वा पापदृष्टः शुक्रः यदि स्यात् तर्हि अश्रुपातात् नेत्रपीडा भवति ।
- चन्द्रकुजौ एकस्मिन् नवांशे यदि भवेतां तर्हि नेत्रयोः चिह्नं भवति ।








- पापदृष्टः पापयुतः वा रविः ५/९/१२ भावे वा यदि स्यात् तर्हि दृष्टिशक्तिः अल्पा भवति।
- पापदृष्टः पापयुतः वा शनिः ५/९/१२ भावे वा यदि स्यात् तर्हि व्याधियुक्तः भवति।

















चन्द्रं पृष्ठोदयस्थम् ....... पूरुषः स्यात् ॥ २४ ॥

- पृष्ठोदयराशिस्थितं चन्द्रं लग्नात् चतुर्थभावस्थितः शनिः यदि पश्यति –
- लग्नाधिपतिः मेषराशौ यदि स्यात् - तर्हि मनुष्यः वामनः=ह्रस्वशरीरः भवति।
- जलचरराशिस्थः चन्द्रः शनिना संयुतः सन् लग्नात् द्वितीयभावे यदि स्यात् अथवा रविः लग्नभावे यदि स्यात् तर्हि मनुष्यः दद्रुरोगेण = कुष्ठरोगेण पीडितः भवति ।



दृष्टे क्रूरैर्न सौम्यैः ....... हर्षहीनः ॥ २५ ॥

- शुभग्रहदृष्टिरहितं लग्नाधिपं षष्ठाधिपं सप्तमाधिपं वा चन्द्रं पापग्रहाः यदि पश्यन्ति तर्हि प्लीहारोगः=उदरसम्बन्धिरोगः भवति ।

| | | | |
|---|---|---|---|
| | कु | | |
| र | प्लीहरोगः | | ल |
| | | | |
| | च | | श |

| | | | |
|---|---|---|---|
| | | | |
| ल | प्लीहरोगः | | |
| च | | | |
| | श | कु | र |

| | | | |
|---|---|---|---|
| र | | | च |
| | प्लीहरोगः | | |
| ल | | | |
| श कु | | | |

- पापदृष्टः शनिः लग्नात् चतुर्थभावे यदि स्यात् तर्हि दृष्टिहीनः भवति ।
- लग्नाधिपः शनिः पापग्रहैः पीडितश्चेत् मनुष्यः दुःखी भवति ।
- पापदृष्टः शनिः लग्नभावे यदि स्यात् तर्हि मनुष्यः प्लीहरोगी दुःखी च भवति ।

| | | | |
|---|---|---|---|
| | श | | |
| | दृष्टिहीनता | | |
| लग्नम् | | | |
| | | र कु | |

| | | | |
|---|---|---|---|
| रा च | श | कु | |
| ल | दुःखी | | |
| र | | | |
| | | | |

| | | | |
|---|---|---|---|
| | ल श | | |
| | प्लीहरोगी दुःखी | | |
| कु | च | | |
| | | र | च |

क्रूराः केन्द्रालयस्थाः ....... भुजेऽङ्गौ ॥ २६ ॥

- यदि पापग्रहाः लग्नात् केन्द्रभावे भवन्ति तर्हि शरीरे अङ्गवैकल्यम् आगच्छति ।
- रविचन्द्रौ एकस्मिन् केन्द्रभावे यदि भवेतां तर्हि अपि अङ्गवैकल्यं चिन्तनीयम् ।
- लग्नभावस्थितं शुक्रं शनिः यदि पश्यति तर्हि कटिप्रदेशे वेदना वैकल्यं वा भवति।

| | | | |
|---|---|---|---|
| | श | | |
| | अङ्गवैकल्यम् | | ल कु |
| र बु च | | | |
| | | | |

| | | | |
|---|---|---|---|
| | | | |
| | अङ्गवैकल्यम् | | लग्नम् |
| | | | |
| | | र च | |

| | | | |
|---|---|---|---|
| | श | | ल शु |
| | कटिवेदना | | |
| | | | |
| | | | |

- लग्नात् चतुर्थभावे शुक्रः यदि स्यात्, अन्यतमे भावे गुरुशनी यदि स्यातां तर्हि कटिप्रदेशे वेदना भवति ।
- लग्नात् चतुर्थभावे शुक्रः यदि स्यात्, अन्यतमे भावे गुरुकुजौ यदि स्यातां तर्हि हस्ते वेदना भवति ।
- लग्नात् चतुर्थभावे शुक्रः यदि स्यात्, अन्यतमे भावे गुरुबुधौ यदि स्यातां तर्हि पादयोः वेदना भवति ।

| | | | |
|---|---|---|---|
| | | | ल |
| | कटिवेदना | | |
| गु श | | | |
| | | | शु |

| | | | |
|---|---|---|---|
| | शु | | गु कु |
| | हस्तवेदना | | |
| ल | | | |
| | | | |

| | | | |
|---|---|---|---|
| | | | |
| शु | पादवेदना | | |
| | | | |
| | ल | गु बु | |

आयुःपुण्याधिनाथौ …….. वैरिरन्ध्रालयस्थाः ॥२७॥

- जातके अष्टम-नवमाधिपौ पापग्रहस्थितराशितः चतुर्थभावे पापग्रहेण च युतौ चेत् जङ्घाप्रदेशे वैकल्यं भवति ।
- लग्नात् षष्ठभावे रवि-कुज-शनि-राहवः यदि भवन्ति तर्हि जङ्घाप्रदेशे =जान्वधोभागे കണക്കാല് ? वैकल्यं भवति
- लग्नात् षष्ठाधिपः, शनिश्च पापदृष्टौ व्ययभावे भवतः चेत् अपि जङ्घाप्रदेशे वैकल्यं भवति ।

| | | | |
|---|---|---|---|
| | | | |
| | जङ्घावैकल्यम् | | कु |
| | | | |
| ल | | र च श | |

| | | | |
|---|---|---|---|
| | र कु श रा | | |
| | जङ्घावैकल्यम् | | |
| | | | |
| | ल | | |

| | | | |
|---|---|---|---|
| | | कु | |
| | जङ्घावैकल्यम् | | |
| | | | |
| ल | शु श | | |

- लग्नात् ६/८ भावे वा रवि-शनि-बुधाः यदि भवन्ति तर्हि हस्तयोः पीडा भवति ।

| | | | |
|---|---|---|---|
| | | | ल |
| | हस्तवेदना | | |
| | | | |
| | र श बु | | |

| | | | |
|---|---|---|---|
| | | | ल |
| | हस्तवेदना | | |
| र श बु | | | |
| | | | |

स्यादार्तिः पञ्चशाखे ..... मेषसिंहालिनक्रे ॥ २८ ॥ (स्यादार्तिः पञ्चशाखे इति पूर्वेण श्लोकेन अन्वयः)

- लग्नात् दशमभावे शनि-शुक्रौ भवतः चेत् नपुंसकः स्यात् ।
- शुक्रस्थितराशितः ६/१२ भावे वा शनिः चेत् नपुंसकसदृशः भवति।

| | | | |
|---|---|---|---|
| | | | |
| | नपुंसकः | | |
| | | | |
| ल | | | शु श |

| | | | |
|---|---|---|---|
| | | श | |
| | नपुंसकसदृशः | | |
| | | | |
| शु | | | |

| | | | |
|---|---|---|---|
| | | | |
| | नपुंसकसदृशः | | |
| | | | |
| शु | श | | |

- लग्नात् नवमाधिपः मेषे सिंहे वृश्चिके मकरे वा भवेत्, तथा च सिंहराशिस्थः चन्द्रः सप्तमस्थं कुजं पश्येत् । एतादृशे योगे जातः काणः भवति ।
- लग्नात् नवमाधिपः मेषे सिंहे वृश्चिके मकरे वा भवेत्, तथा च कर्कराशिस्थः रविः सप्तमस्थं कुजं पश्येत्। तदा जातः काणः भवति ।

| | | | |
|---|---|---|---|
| | | | |
| कु | काणः | | |
| | | | च |
| | शु | | ल |

| | | | |
|---|---|---|---|
| | | | |
| | काणः | | र |
| कु | | | बु |
| | | ल | |

अन्योन्यं पश्यतश्चेत् ..... क्लीबयोगाः षडेते ॥ २९ ॥ एते षट् क्लीबयोगाः **अन्योन्यं यदि पश्यतः शशिरवी** – (बृहज्जातकम्- अ.४, श्लो.१३ ) इत्यत्र व्याख्याताः एव ।

**क्रूरैर्दृष्टे विलग्ने ....... बन्धनं नुः ॥ ३१ ॥**

- मेषः वृषः धनुः वा यदि लग्नम्, तत् लग्नं पापग्रहः यदि पश्यति तर्हि दन्तेषु विकृतिः=असमानता=वक्रत्वं संभवति।

| | | | |
|---|---|---|---|
| | ल | | |
| श | विकृतदन्तः | | |
| | | | |
| | | कु र | |

| | | | |
|---|---|---|---|
| | | ल | |
| | विकृतदन्तः | | |
| | | | श |
| | र | कु | |

| | | | |
|---|---|---|---|
| श | | | र |
| | विकृतदन्तः | | |
| | | | |
| ल | | | कु |

- वृषः धनुः वा यदि लग्नम्, तस्मिन् लग्ने यदि पापग्रहः तर्हि मनुष्यः खल्वाटः=खलतिः=शिरसः मध्यभागे केशविहीनः भवति।

| | | | |
|---|---|---|---|
| | | ल कु | |
| | खल्वाटः | | |
| | | | |
| | | | |

| | | | |
|---|---|---|---|
| | | | |
| | खल्वाटः | | |
| | | | |
| ल कु | | | |

- लग्नात् २,५,९,१२ भावेषु पापग्रहाः भवन्ति चेत् मनुष्यः कारागृहवासी भवति ।
- मेषः वृषः धनुः वा यदि लग्नम्, लग्नात् २,५,९,१२ भावेषु पापग्रहाः यदि भवन्ति तर्हि रज्जुकृतबन्धनयोगः वक्तव्यः।

| | | | |
|---|---|---|---|
| च | | | कु |
| ल | बन्धनप्राप्तिः | | |
| र बु | | | |
| | | श | |

| | | | |
|---|---|---|---|
| च | ल | र बु | |
| | रज्जुबन्धनयोगः | | |
| | | | कु |
| श | | | |

दुर्गन्धिर्दानवेज्ये ...... स्याद्विगन्धिः ॥ ३२ ॥

- शुक्रः शनेः राशौ=मकरे कुम्भे वा यदि स्यात् -
- लग्नात् षष्ठाधिपतिः मिथुने कन्यायां मकरे वा यदि स्यात् -
- लग्नात् केन्द्रभावे बुधस्य राशौ = मिथुने कन्यायां वा बुध-शुक्रौ यदि भवेतां – तर्हि जातस्य शरीरात् सर्वदा दुर्गन्धः आगच्छति।

| | | | |
|---|---|---|---|
| | | | |
| शु | दुर्गन्धिः (शरीरे) | | |
| | | | |
| | | | |

| | | | |
|---|---|---|---|
| | | | |
| ल | दुर्गन्धिः (शरीरे) | | |
| च | | | |
| | | | |

| | | | |
|---|---|---|---|
| | | | |
| | दुर्गन्धिः (शरीरे) | | |
| | | | |
| ल | | | बु शु |

- शुक्रः शनिश्च स्वक्षेत्रादिषु स्थितौ अथवा मेषराशौ लग्नं चन्द्रश्च यदि स्यातां तर्हि मुखात् दुर्गन्धः आगच्छति ।

<table>
<tr><td></td><td></td><td></td><td></td></tr>
<tr><td></td><td rowspan="2" colspan="2">दुर्गन्धिः<br>(मुखे)</td><td></td></tr>
<tr><td>श ३°</td><td></td></tr>
<tr><td></td><td></td><td>शु २°</td><td></td></tr>
</table>

<table>
<tr><td></td><td>ल च</td><td></td><td></td></tr>
<tr><td></td><td rowspan="2" colspan="2">दुर्गन्धिः<br>(मुखे)</td><td></td></tr>
<tr><td></td><td></td></tr>
<tr><td></td><td></td><td></td><td></td></tr>
</table>

**एवं ग्रहाणां सदसत्फलानाम् …… प्रविचार्य नूनम् ॥ ३३॥**

एवं ज्यौतिषिकैः जातके सदसत्फलदायकानां ग्रहाणां योगात् शुभम् अशुभं वा फलं सम्यग् विचार्य (योगकर्तॄणां ग्रहाणां बलम्, तेषां दशान्तर्दशाकालं च ज्ञात्वा) वक्तव्यम् ।

॥ इति योगाध्यायः चतुर्थः